# શ્રીમુકુન્દરાયાષ્ટકમ્

shrImukundarAyAShTakam

sanskritdocuments.org

March 17, 2018

# shrImukundarAyAShTakam

# શ્રીમુકુન્દરાયાષ્ટકમ્

## Sanskrit Document Information

Text title : mukundarAyAShTakam

File name : mukundarAyAShTakam.itx

Category : deities_misc, gurudev, puShTimArgIya, aShTaka

Location : doc_deities_misc

Author : giridharajI

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

shrImukundarAyAShTakam

# શ્રીમુકુન્દરાયાષ્ટકમ્

(રામકલી-ગણેશ ગીયતે)

વનિતોપહાસનૃત્યત્સ્મિતવદનાનન્દજોષતોષદાયિન્ ।
શ્રીમન્મુકુન્દરાય ત્વય્યાસક્તં મનો મેઽસ્તુ ॥ ૧॥

મણિમયનન્દાવાસે કુમારિકાવૃન્દશોભિસદ્ધાસ્યે ।
નવનીતલોભિતાસ્યે  (સતતં ત્વયિ હરૌ) મતિર્મેઽસ્તુ ॥ ૨॥

પરિધૃતહીરકહારં વ્રજાઙ્ગનાદર્શનીયકૌમારમ્ ।
કૃતગોપુચ્છવિહારં જિતમારં પ્રણૌમિ હૃત્સારમ્ ॥ ૩॥

સકલોપનિષત્સારં સ્વાનન્દાપ્રાકૃતાકારમ્ ।
વન્દે નન્દકુમારં વારં વારં સ્વદાતારમ્ ॥ ૪॥

કિઙ્કિણીનૂપુરરણિતં  (સતતં) સિંહાવલોકનં કર્ત્રે ।
વ્રજજનમાનસહર્ત્રે નિજાર્તિહર્ત્રે નમસ્કુર્મઃ ॥ ૫॥

અલકસમાવૃતવદનં સુકુન્દકલિકાસુશોભિતં સ્વાસ્યમ્ ।
ગોપયુવતીરતિસદનં જિતમદનં નન્દનન્દનં નૌમિ ॥ ૬॥

વ્રજકર્દમલિપ્તાઙ્ગં કરધૃતનવનીતમોહિતાનઙ્ગમ્ ।
વન્દે લોલવિલોચનાસક્તાઙ્ગનાસઙ્ગમ્ ॥ ૭॥

નર્તનલીલાકરણં મનોહરણં વપુષા નન્દવિસ્તરણમ્ ।
સેવકજનભવતરણં યામિ તમહં સદૈવ શરણમ્ ॥ ૮॥

તવ લીલારસલુબ્ધાઃ શ્રીમુકુન્દરાયાષ્ટકં પ્રેષ્ણા ।
સાધનજાલસહસ્રં ત્યક્ત્વાજસ્રં પઠધ્વં વૈ ॥ ૯॥

ઇતિ શ્રીમદ્યદુનાથકુલોદ્ભવશ્રીગોપાલાત્મજશ્રીગિરધરેણવિરચિતં
શ્રીમુકુન્દરાયાષ્ટકં સમાપ્તમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrImukundarAyAShTakam*

pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*